दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखकृष्णचतुर्थी
चैत्र 23 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-164 | 1 | अप्रैल 06, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 सर्वकारस्य प्रार्थना: एलपीजी-कोषान् अन्तर्जाल- माध्यमेन (Online) एव आरक्षयन्तु, आवश्यकतायाम् एव वितरकं प्रति गच्छन्तु

3 गोपालयोजनान्तर्गतं १४.६८ कोटिरूप्यकाणां वितरणं, निराश्रितगोवंशस्य संरक्षणं भविष्यति सुनिश्चितम्- चन्द्रकुमारः

4 ऑक्सफोर्ड-विश्वविद्यालयस्य बोडलेयन-पुस्तकालयेन शिक्षापद्याः द्विशततम-वर्षगांठ-अवसरे संपूर्ण-ब्रिटेन-देशे प्रदर्शनी-यात्रायाः आयोजनम्

## भारतीय निर्वाचनायोगेन उक्तं यत् आगामिनां विधानसभानिर्वाचनानां उपनिर्वाचनानां च पूर्वं मतदातॄन् प्रलोभनैः प्रभावितुं प्रयत्नेन सार्धषट्शत कोटिरूप्यकाधिकमूल्यात्मिका नां सामग्रीणां निगडनं जातम्।




भारतीय निर्वाचनायोगेन उक्तं यत् आगामिनां विधानसभानिर्वाचनानां उपनिर्वाचनानां च पूर्वं मतदातॄन् अन्यैः प्रलोभनैः प्रभावितुं प्रयत्नेन सार्धषट्शत कोटिरूप्यकाधिकमूल्यात्मिकानां सामग्रीणां निगडनं जातम्। निगडितेषु सामग्रीषु धनानि, मादकद्रव्याणि, धातवः, निःशुल्कोपहाराः च सम्मिलिताः सन्ति। आयोगेन एतत् अपि प्रतिपादितं यत् प्रवर्तन अधिकारिणः सुनिश्चितवन्तः यत् निरीक्षणकाले सामान्यान् नागरिकान् प्रति न काचन असुविधा, उत्पीडनं वा भवेत्।

## ध्यानं मानसिकीम् अशांति न्यूनीकरोति, एकाग्रतां वर्धयति, भावनात्मकतया च सशक्तीकरणं करोति - उपराष्ट्रपतिः



उपराष्ट्रपतिः सी पी राधाकृष्णनः उक्तवान् यत् मानसिक-शान्तेः आत्मावलोकनस्य च महत्त्वं वर्धितम् अस्ति, ध्यानमेव समग्रस्वास्थ्यस्य कुंजिका अस्ति। नवदेहल्यां विश्व-ध्यान-सम्मेलनावसरे तेन उक्तं यत् ध्यानं मानसिकीम् अशांति न्यूनीकरोति, एकाग्रतां वर्धयति, भावनात्मकतया च सशक्तीकरणं करोति। श्री राधाकृष्णनः अवदत् यत् सप्तचत्वारिंशदधिकद्विसहस्र तमे वर्षे विकसित-भारतस्य निर्माणाय देशे अनुशासितानि-प्रयत्नानि आवश्यकानि सन्ति, यानि मनसः, शरीरस्य, आत्मनश्च संतुलनेन एव सम्भवन्ति।

## भारतदेशः ईरानदेशात् चत्वारिंशत् देशेभ्यः शिलातैलम् आयातं करोति, अस्य क्रये वित्त-सम्बद्धा कापि समस्या नास्ति - हरदीप सिंह पुरी



शिलातैल - प्राकृतिक वात्येन्धनमन्त्री हरदीप सिंह पुरी उक्तवान् यत् भारतदेशः ईरानदेशात् चत्वारिंशत् देशेभ्यः शिलातैलम् आयातं करोति, अस्य क्रये वित्त-सम्बद्धा कापि समस्या नास्ति। सामाजिक माध्यमेषु प्रकाशिते एकस्मिन् संदेशे, श्री पुरी सामाजिक-माध्यमैः मिथ्या प्रचारान् निराकृतवान्, येषु उक्तम् आसीत् यत् वित्तीयाः समस्यायाः कारणात् ईरानदेशात् वात्येन्धनस्य एकं वाहन-समूहं भारतस्य वडीनार-स्थलात् चीनदेशं प्रति परिवर्तितः आसीत्। असौ एतान् तथ्यान् असत्यं प्रतिपादितवान्। सः उक्तवान् यत् पश्चिम एशियायाम् आपूर्ती व्यवधाने सति अपि, भारतीय-शोधन केन्द्राणि ईरानदेशं समेत्य विविधस्रोतेभ्यः वात्येन्धनस्य आवश्यकतां सफलतापूर्वकं पूरयितुं समर्थानि जातानि।

## प्रशासनं जनप्रतिनिधित्वस्य रक्षणाय वैधानिक प्रतिभूतिः दास्यति - प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् प्रशासनम् एतत् सुनिश्चितं करिष्यति यत् केरल, तमिलनाडु, कर्णाटक आन्ध्र प्रदेश, गोवा, तेलंगाना चेत्येतेषु राज्येषु लोकसभायाः आसनसंख्यायां न्यूनता न भविष्यति। केरल राज्ये तिरुवल्ला-नगरे आयोजितायां सभायां सः अवदत् यत् मिथ्यावार्तां प्रसार्यते यत् उत्तमजनसंख्या-नियन्त्रणकारणेन दक्षिणराज्येषु आसनसंख्या न्यूना भवेत्। श्रीमोदिना आश्वासितं यत् प्रशासनं जनप्रतिनिधित्वस्य रक्षणाय वैधानिक प्रतिभूतिः अपि दास्यति। प्रधानमन्त्री सर्वान् राजनीतिकदलान् प्रति समाह्वानं कृतवान् यत् ते लोकसभायां विधानसभासु च महिलाभ्यः त्रयस्त्रिंशत् प्रतिशत आरक्षणस्य प्रस्तावस्य समर्थनं कुर्वन्तु। तेन अस्मिन् विषये जनान् प्रति अपि आह्वानं कृतम् यत् ते विपक्षम् अपि सहयोगं कर्तुं प्रेरयन्तु। प्रधानमन्त्री उक्तवान् यत् त्रयोविंशत्यधिकद्विसहस्र तमे वर्षे पारितस्य महिला आरक्षण-विधेः कार्यान्वयनं अग्रे नेतुं संसदि आयव्यय-सत्रं दिनत्रयपर्यन्तं विस्तारितं कृत्वा अस्य मासस्य षोडश, सप्तदश, अष्टादश चेति तिथिषु आयोजितं भविष्यति।

## मतदान-तिथीनामालक्ष्य प्रमुखेषु राज्येषु निर्वाचन प्रचारः सजवं प्रचलति



मतदान-तिथीनामालक्ष्य प्रमुखेषु राज्येषु निर्वाचन प्रचारः सजवं प्रचलति। अस्मिन् अवसरे शीर्ष नेतारः जनसम्पर्क अभियानं सक्रियरूपेण कुर्वन्ति। पश्चिम बङ्गाले अप्रैलमासस्य त्रयोविंशतिः, नवविंशतिः दिवसयोः भवितव्ययोः मतदानयोः पूर्वं प्रचारे तीव्रता वर्धितास्ति। प्रधानमन्त्री नरेन्द्रमोदी कूचबिहार-नगर्यां एकां सभां सम्बोधितवान्। अपरत्र मुख्यमन्त्री ममता-बनर्जी राज्ये सर्वत्र प्रचारं कुर्वती अस्ति। सममेव कांग्रेस, वामपन्थिनः अन्ये च दलानि जनसभाः कुर्वन्ति। असम-राज्ये अपि राजनीतिक-क्रियाकलापाः तीव्राः जाताः। कांग्रेस नेता राहुलगान्धी विश्वनाथ-क्षेत्रे एकां सभां सम्बोधितवान्, यत्र सः भाजपा-प्रशासनम् अपूर्णकार्याणि आमालक्ष्य आक्षिप्तवान्। तमिलनाडु राज्ये अपि प्रचारः सजवं अनुवर्तते। डीएमके-दलस्य प्रमुखः एम. के. स्टालिन् स्वस्य गठबन्धन-सहयोगिनां कृते प्रचारं करोति, तथा एआईएडीएमके-दलस्य नेतारः, गृहे गृहे च गत्वा जनसम्पर्क कुर्वन्ति।

## सुभाषितम्

**प्रीणाति यः सुचरितैः पितरं स पुत्रो,**
**यद्भर्तुरेव हितमिच्छति तत्कलत्रम्।**
**तन्मित्रमापदि सुखे च समक्रियं यद्,**
**एतत्त्रयं जगति पुण्यकृतो लभन्ते।।**

भावार्थ- जो अपने सदाचरण से पिता को प्रसन्न/ संतुष्ट रखे, वही वास्तव में पुत्र है। जो सदैव अपने पति की शुभेच्छु हो, वही पत्नी है। जो सुख-दुख में सदैव समान भाव रखे, वही वास्तविक मित्र है और ये तीनों उसी को प्राप्त होते हैं जिसने संसार में पुण्यकर्म किए हों।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## एफ-15 ई इत्यस्य युद्धविमानस्य द्वितीयः अपि चालकः सुरक्षित-रूपेण उद्धारितः - डॉनाल्ड ट्रम्पः



अमेरिकादेशस्य राष्ट्रपतिना डॉनाल्ड ट्रम्पेण सूचितम् यत् एफ-15 ई इत्यस्य युद्धविमानस्य द्वितीयः अपि चालकः सुरक्षितरूपेण उद्धारितः अस्ति। ईरानेन युद्धविमानं पातिते सति अस्य चालकस्य अन्वेषणं क्रियमाणम् आसीत्। श्री ट्रम्पः अवदत् यत् अयं चालकः ईरानदेशस्य पर्वतीयप्रदेशे बद्धः आसीत्।

# सर्वकारस्य प्रार्थना: एलपीजी-कोषान् अन्तर्जाल- माध्यमेन (Online) एव आरक्षयन्तु, आवश्यकतायाम् एव वितरकं प्रति गच्छन्तु



**हिमसंस्कृतवार्ताः- नवदेहली।** अन्तर्जाल-माध्यमेन आरक्षणस्य (Booking) वृद्धौ सत्यामपि पाकशाला- वाष्प- वितरणसंस्थानां (LPG Agencies) बहिः सुदीर्घाः पङ्क्तीः दृष्ट्वा सर्वकारेण जनाः प्रार्थिताः यत् ते 'ऑनलाइन' माध्यमेन एव अनिलकोषान् आरक्षयन्तु, अनिवार्यं चेदेव वितरकाणां समीपं गच्छन्तु। पश्चिम- एशिया-सङ्कटस्य परिप्रेक्ष्ये सर्वकारेण रविवासरे पुनः स्पष्टीकृतं यत् 'होर्मुज-जलडमरूमध्य' मार्गेण ऊर्जा-आपूर्तेः प्रभावितस्थितीः अवलोक्य पेट्रोलियम-प्राकृतिकवाष्प-मन्त्रालयेन सम्पूर्णदेशे पेट्रोलियम-उत्पादानां एलपीजी-वाष्पस्य च निरन्तरा आपूर्त्तिः सुनिश्चिता क्रियते। वर्तमाने देशे एतेषां पर्याप्तः भण्डारः अस्ति। मन्त्रालयेन उक्तं यत् वितरकेषु वाष्पस्य न्यूनतायाः (Out of stock) काऽपि सूचना नास्ति। अन्तर्जाल-माध्यमेन एलपीजी-आरक्षणं वर्धित्वा ९५ प्रतिशतं जातम्। शनिवासरे ५१ लक्षाधिकेभ्यः गृहेभ्यः अनिलकोष-वितरणं कृतम्। अपहारं (Black marketing) रोद्धु डीएसी (DAC - Delivery Authentication Code) आधारितवितरणं फरवरीमासे ५३ प्रतिशतं आसीत्, यत् वर्धित्वा शनिवासरे ९० प्रतिशतं जातम्। प्रवासीश्रमिकेभ्यः छात्रेभ्यः च शनिवासरे ९०,००० तः अधिकाः ५ किलोग्राम- परिमित- लघु-अनिलकोषाः विक्रिताः। देशे पीएनजी (PNG) विस्तारः अपि वेगेन वर्धते, मार्च-मासात् ३.६ लक्ष-सम्बन्धेभ्यः (Connections) आपूर्तिः प्रारब्धा तथा ३.९ लक्षाधिकानि नूतनानि पञ्जीकरणानि अभवन्। पश्चिम-एशियाक्षेत्रे निरुद्धाः सर्वे भारतीयाः नाविकुलाः सुरक्षिताः सन्ति। गतेषु २४ घण्टासु भारतीय-ध्वज-युक्तानां पोतानां (Ships) काऽपि अप्रियघटना न घटिता। विदेशमन्त्रालयेन खाडी-पश्चिम- एशिया-क्षेत्रस्य स्थितेः निरन्तरं निरीक्षणं क्रियते। २८ फरवरी-दिनाङ्कात् अधुना यावत् ७.०२ लक्षाधिकः भारतीयाः स्वदेशं प्रत्यावृत्ताः। सर्वकारेण घोषितं यत् पेट्रोल- डीजल- एलपीजी-इत्येतेषाम् उपलब्धतायै सर्वविधः प्रयासः क्रियते, अतः जनाः भयेन अनावश्यक-आरक्षणं च न कुर्वन्तु। एलपीजी-सञ्चयकरणं कृष्ण-विपणनं (Black marketing) च रोद्धु अनेकेषु राज्येषु केन्द्राशासितप्रदेशेषु च 'धाडी' (Raids) निरन्तरं भवति। मार्चमासात् अधुना यावत् राज्यैः तैलसंस्थाभिः च मिलित्वा ५०,००० तः अधिकाः अनिलकोषाः गृहीताः। संस्थानां अधिकारिभ्यः आकस्मिक-निरीक्षण-व्यवस्थां सुदृढीकर्तुं निर्देशाः दत्ताः। अधुना यावत् १४०० तः अधिकेभ्यः वितरकेभ्यः 'कारण-पृच्छा-सूचना' प्रेषिता, तथा ३६ वितरकाः निलम्बिताः (Suspend) कृताः। उपभोक्तृभ्यः डी-पीएनजी तथा सीएनजी-परिवहनार्थं शतप्रतिशतम् आपूर्तिं प्राधान्यं च दत्तं वर्तते।

# भूमिभ्रष्टाचारे अनावरितान् मुखान् रक्षितुं संलग्ना सुक्खु-सर्वकारः- जयरामठाकुरः



**हिमसंस्कृतवार्ताः - मण्डी।** पूर्वमुख्यमन्त्री नेता प्रतिपक्षश्च जयरामठाकुरः भ्रष्टाचारस्य गम्भीरारोपाणां विषये प्रदेशस्य सुक्खु- सर्वकारस्य उपरि तीक्ष्णप्रहारं कृतवान्। सः अवदत् यत् यदा भ्रष्टाचारे संलिप्तानि मुखानि अनावरितानि भवितुम् आरब्धानि, तदा सम्पूर्णे काङ्ग्रेसदले सर्वकारे च संक्षोभः उत्पन्नः। मंडीनगरात् प्रसारितायां विज्ञप्तौ जयरामठाकुरः मुख्यमन्त्रिणं प्रति साक्षात् प्रहारं कुर्वन् उक्तवान् यत् प्रकरणस्य निष्पक्षान्वेषणं कृत्वा कार्यविधिकरणस्य स्थाने मुख्यमन्त्री साक्ष्यान् गोपयितुं दोषगणान् रक्षितुं च संलग्नः अस्ति, यत् लोकतान्त्रिकमर्यादायाः विरुद्धं तथा अत्यन्तं दुर्भाग्यपूर्णं च अस्ति।'चेस्टर हिल्स' इति प्रकरणस्य विशेषं उल्लेखं कुर्वन् नेता प्रतिपक्षः अवदत् यत् यद्यपि सर्वकारेण भारीप्रभावेन तथा सामाजिकमाध्यमेषु प्रकरणस्य उद्घाटनानन्तरं मुख्यसचिवेन निर्गतं विवादास्पदं पत्रं प्रत्याहृतं (वापस), तथापि अनेन सर्वकारस्य उत्तरदायित्वं न समाप्तं भवति। अपि तु अनेके अनुत्तरीताः प्रश्नाः उत्थिताः सन्ति, येषां समाधानं 'व्यवस्था-परिवर्तनस्य' घोषं कुर्वता अमुना 'सुखस्य सर्वकारेण' जनसामान्याय दातव्यमेव भविष्यति।

जयरामठाकुरः क्रमिकरूपेण सर्वकारं घेरणं कुर्वन् पृष्टवान् यत् अन्ते एतादृशी का विवशता आसीत् येन मुख्यसचिवेन लिखितं पत्रं झटिति (शीघ्रमेव) प्रत्याहर्तव्यं जातम्? किम् तत् पत्रं वास्तवतः अधिकारक्षेत्रात् बहिः गत्वा लिखितम् आसीत्? सः अस्याः सम्पूर्णप्रक्रियायाः पारदर्शित्वे प्रश्नं कुर्वन् अपृच्छत् यत् एतत् पत्रं कस्य निर्देशानुसारं लिखितम् आसीत् तथा अस्य पृष्ठतः वास्तविकं मन्तव्यं (Intention) किम् आसीत्? विशेषतः अधिकारिणः कार्यप्रणाल्याः उपरि अङ्गुलीनिर्देशं कुर्वन् सः पृष्टवान् यत् यदा अतिरिक्तमुख्यसचिवः (राजस्वम्) अवकाशे आसीत्, तदा तस्य कार्यभारं वहता अधिकारिणा एतादृशम् 'अतिरिक्तपरिश्रमं' प्रदर्श्य त्वरितगतिना निर्णयः किमर्थं श्रावितः? महती वार्ता इयं यत् उभयोः पक्षयोः तर्कान् (Arguments) अश्रुत्वा एव एकपक्षीयनिर्णयः कस्य हितसाधनाय स्वीकृतः? जयरामठाकुरः मुख्यमन्त्रिणः भूमिकायाम् अपि प्रखरविरोधं प्रकटितवान्। सः उक्तवान् यत् यदा एतत् प्रकरणं प्रसारमाध्यमानां सामाजिकमाध्यमानां च माध्यमेन सार्वजनिकं जातम् आसीत्, तदा मुख्यमन्त्री सम्पूर्णप्रकरणात् अनभिज्ञतायाः 'अभिनयं' किमर्थं कुर्वन् आसीत्? केन आधारेण च निरन्तरं सम्बद्धक्षेत्राधिकारिणां रक्षणं क्रियते स्म? सः स्पष्टीकृतवान् यत् भ्रष्टाचारस्य अस्यां क्रीडायां जवनिकायाः पृष्ठतः स्थितानि पात्राणि अधुना गोपनस्थानं न प्राप्स्यन्ति। सर्वकारेण एतेषां तीक्ष्णप्रश्नानाम् उत्तरं दातव्यमेव भविष्यति, यतः प्रदेशस्य जनता पश्यति यत् कथं सत्तायाः दुरुपयोगं कृत्वा प्रियपात्रेभ्यः लाभः प्रदीयत इति। जयरामठाकुरः सचेतनापूर्णस्वरेण अवदत् यत् पत्रस्य प्रत्याहरणं केवलम् एकं छद्मवरणम् अस्ति, यदा तु वास्तविकं क्रीडनं तस्यां प्रक्रियायां मन्तव्ये च निहितं अस्ति यस्याः अन्तर्गतं एकपक्षीय- आदेशाः पारितः आसन्। विपक्षः एतत् प्रकरणं तार्किकपरिणतिं यावत् नेतुं प्रतिबद्धः अस्ति।

# शिमलातः हमीरपुरं प्रति स्थानान्तरितं भविष्यति आरक्षकदलस्य तकनीकी-निदेशालयः, मुख्यमन्त्रिणः

## आयव्ययक-घोषणायाः अनन्तरं आरक्षकमहानिदेशकेन आदेशाः कृताः



**हिमसंस्कृतवार्ताः -शिमला।** हिमाचलप्रदेशे आरक्षकविभागेन (Police Department) सम्बद्धः एकः महत्त्वपूर्णः निर्णयः स्वीकृतः। राज्यस्य आरक्षक- महानिदेशकेन अशोकतिवारी- महोदयेन निर्गतादेशानुसारं, 'सञ्चार एवं तकनीकी- सेवा- निदेशालयः' (Directorate of Communication & Technical Services) शिमलातः हमीरपुर-जनपदं प्रति स्थानान्तरितः भविष्यति। एषः आदेशः मुख्यमन्त्रिणा वित्तीयवर्ष २०२६-२७ तमस्य आयव्ययक-भाषणे (Budget Speech) कृतायाः घोषणायाः अनुपालने निर्गतः अस्ति।

अद्यपर्यन्तम् एषः निदेशालयः शिमलास्थितस्य सतर्कता (विजिलेंस) मुख्यालयस्य परिसरे कार्यं करोति स्म, परन्तु जनहितं ध्यानं दत्त्वा अयं हमीरपुरं प्रति प्रेषयितुं निश्चितः। आदेशानुसारं एतत् स्थानान्तरणं सद्यः प्रभावेण (Immediate effect) प्रवर्तितं भविष्यति।

**शिमलातः स्थानान्तरणस्य विवरणम्**

अयं निदेशालयः पूर्वं 'स्टेट् विजिलेंस एण्ड एण्टी करप्शन ब्यूरो' इत्यस्य मुख्यकार्यालये संचालितः आसीत्। आरक्षक-महानिदेशकेन आयव्ययक-घोषणाम् आधारं मत्वा अस्य स्थानान्तरणस्य आदेशाः प्रदत्ताः। न केवलं आदेशाः, अपितु निदेशालयस्य सम्पूर्णं उपकरणं (सामानं) कर्मचारिवृन्दः च हमीरपुरं प्रति प्रस्थितः। अस्य निर्णयस्य सूचना आवश्यककार्यविधिः च मन्त्रालयस्य सम्बद्धाधिकारिभ्यः प्रेषिता अस्ति। एतेषु गृहविभागस्य अतिरिक्त- मुख्यसचिवः, आरक्षक- महानिरीक्षकः (सञ्चार एवं तकनीकीसेवा), आरक्षक-अधीक्षकः तथा हमीरपुरस्य आरक्षक-अधीक्षकः च सम्मिलिताः सन्ति। सर्वकारस्य एषः निर्णयः प्रशासनिकदृष्ट्या अतीव महत्त्वपूर्णः मन्यते, येन क्षेत्रीयस्तरे आरक्षक-सेवानां सुदृढीकरणे साहाय्यं प्राप्स्यते।

# गोपालयोजनान्तर्गतं १४.६८ कोटिरूप्यकाणां वितरणं, निराश्रितगोवंशस्य संरक्षणं भविष्यति सुनिश्चितम्- चन्द्रकुमारः



**हिमसंस्कृतवार्ताः- शिमला।** पशुपालनमन्त्री चन्द्रकुमारः उक्तवान् यत् राज्यसर्वकारेण निराश्रितगोवंशस्य वर्धमानसमस्यायाः समाधानाय कृषकाणां सस्यानां रक्षणाय च महत्त्वपूर्णाः निर्णयाः स्वीकृताः। वित्तीयवर्षे २०२५-२६ मध्ये 'गोपालयोजना' इत्यस्याः अन्तर्गतं १४.६८ कोटिरूप्यकाणां राशिः वितरिता। सः अवदत् यत् अनया धनराश्या राज्ये निराश्रितगवाम् उचितपालनम् आश्रयश्च सुनिश्चितः कृतः। चन्द्रकुमारः उक्तवान् यत् निराश्रितपशुभ्यः उत्पन्नाः गम्भीराः समस्याः, विशेषतः सस्यानां हानिं दृष्ट्वा सर्वकारेण समाधानदिशि दृढाः प्रयासाः कृताः। निराश्रितपशूनां कारणात् सस्यहान्या कृषकाणां महती आर्थिकहानिः भवति स्म, येन केषुचित् स्थानेषु कृषकाः न्यूनकृषिं कर्तुं वा कृषिं त्यक्तुं वा विवशाः अभवन्। सः अवदत् यत् संरक्षणदृष्ट्या सर्वकारेण महत्त्वपूर्णं प्रारम्भं कृत्वा पञ्जीकृतगोशालासु अभयारण्येषु च गवां परिपालनार्थं दीयमानायां वित्तीयसहायतायां उल्लेखनीया वृद्धिः कृता अस्ति। एतासां गोशालानां कृते दीयमानं मासिकं अनुदानं प्रतिधेनु ७०० रूप्यकेभ्यः वर्धयित्वा १,२०० रूप्यकाणि कृतम्, यत् १ अक्तूबर २०२५ तः प्रभावी अस्ति। इयं वित्तीयसहायता 'हिमाचलप्रदेश- गौसेवा- आयोग' इत्यस्य माध्यमेन वितरिता भवति, येन पशूनां श्रेष्ठप्रबन्धनं सुनिश्चितं जायते। निराश्रितगोवंशस्य उचितेन पुनर्वसनेन न केवलं कृषकाणां समस्यानां समाधानं भविष्यति, अपितु कृषकाः पुनः कृषिं प्रति प्रेरिताः भविष्यन्ति। अनेन मार्गदुर्घटनासु न्यूनतायाः सहैव मार्गसुरक्षायां अपि परिष्कारः भविष्यति।
सः अवदत् यत् आयव्ययके (बजट्) २०२६-२७ मध्ये निराश्रितगोवंशस्य पुनर्वसनाय अनेके नवीनाः प्रावधानाः कृताः सन्ति। गतवर्षेषु राज्यसर्वकारेण बहूनि गो-अभयारण्याणि बृहत्-गोसदनानि च स्थापितानि। प्रतिष्ठिताः स्वयंसेविसंस्थाः, अशासकीयसंस्थाः (NGOs) तथा आकांक्षिणः उद्योगसमूहाः कस्यापि सर्वकारीयगोसदनस्य वा गो-अभयारण्यस्य वा दत्तकग्रहणं (To adopt) कर्तुं शक्नुवन्ति, तदर्थं अनुमतिः प्रदास्यते।

# श्रीजगन्नाथ- संस्कृतविश्वविद्यालये वाग्वर्धिनीसभायाः नवमं सत्रं समाचरितम्



**हिमसंस्कृतवार्ता।** अप्रैलमासस्य चतुर्थे दिनांके शनिवासरे पुरीस्थे श्रीजगन्नाथ- संस्कृतविश्वविद्यालये वाग्वर्धिनीसभायाः नवमं सत्रं समाचरितम्। सत्रस्यारम्भे लौकिकं मङ्गलं समाचरत् व्याकरणविभागस्य आचार्यद्वितीयवर्षस्य छात्रा एस. शुभश्री। अवसरेऽस्मिन् विशिष्टातिथिरूपेण उपस्थाय छात्राणां मार्गदर्शनम् अकुर्वन् श्रीलालबहादुरशास्त्रि- राष्ट्रिय- संस्कृत- विश्वविद्यालयस्य शिक्षापीठस्य सहायकाचार्याः डॉ. परमेशकुमारशर्ममहाशयाः। तेषां सत्कारं अथ च छात्राणां मार्गदर्शनं कृतवन्तः व्याकरणविभागस्य सहायकाचार्याः डॉ. अजयदाशमहाशयाः। नयायविभागस्य डॉ. रश्मिता जेना महाशया अत्रावसरे उपस्थाय छात्राणां अभिप्रेरणं कृतवत्यः। सर्वेषां वाचिकं स्वागतं कृतवती सत्रसंयोजिका, व्याकरणविभागस्य सहायकाचार्या डॉ. प्रज्ञा। अत्र सत्रे पञ्चछात्राः स्वीयम् अभीप्सितं विषयम् उपास्थापयन्। व्याकरणविभागस्य आचार्य- प्रथमवर्षस्य छात्रा ममता प्रधानः(महाभाष्यस्य परिचयः), यशमतिः गिरिः (परिभाषेन्दुशेखरस्य मङ्गलाचरणम्), रानी नायकः(दशलकाराणां परिचयः), शुभाशीषः खटुआ (वृद्धिरादैच्), न्यायविभागस्य शुभस्वागतिका पुहानः अदृष्टसिद्धिः इति विषये चर्चां कृतवती। इयं वाग्वर्धिनी सभा प्रतिसप्ताहं शनिवासरे समाचर्यते। अत्रावसरे विभिन्नेभ्यः विभागेभ्यः सप्तचत्वारिंशता छात्रैः सहभागः कृतः। छात्राः उत्साहिनः सन्तः प्रतिभागिभ्यः स्वजिज्ञासां पृष्टवन्तः। अत्रावसरे धन्यवादज्ञापनं कृतवती व्याकरणविभागस्य आचार्यप्रथमवर्षस्य छात्रा पूजाराणीसाहू। सत्रस्य निर्वहणं कृतवती व्याकरणविभागस्य आचार्यद्वितीयवर्षस्य छात्रा प्रियङ्का महापात्रः। सर्वेषां सहयोगेन कार्यक्रमः सुसम्पन्नः। कल्याणमन्त्रेण सभेयं सम्पोषिता।



डॉ विमलेश झा, डीएवी पब्लिक स्कूल बरारी भागलपुर बिहार

# ज्योतिर्लिङ्गेषु

## काशीविश्वनाथमहिमा

भारतीयसंस्कृतौ भगवान् शिवः सर्वोच्चपूज्यदेवतासु अन्यतमःविद्यते । सः संहारकर्ता, अनुग्रहकर्ता, योगीश्वरः, करुणासागरः च अस्ति। तस्य आराधनायाः विविधरूपाणि सन्ति, तेषु "ज्योतिर्लिङ्ग" इति विशेषमहत्त्वपूर्णं स्थानम् अधिगच्छति।
भारतदेशे द्वादश ज्योतिर्लिङ्गानि प्रसिद्धानि सन्ति, यत्र भगवान् शिवः ज्योतिर्मयरूपेण प्रतिष्ठितः। तेषु काशीस्थितः काशीविश्वनाथः सर्वाधिकपूजनीयः, मोक्षदायकः, भक्तानां हृदयस्थः च अस्ति। अतः अस्मिन् निबन्धे ज्योतिर्लिङ्गपरम्परायां काशीविश्वनाथस्य महिमा, इतिहासः, आध्यात्मिकमहत्त्वम्, सांस्कृतिकप्रभावः च विस्तारतः विवेच्यन्ते।
"ज्योतिर्लिङ्ग" इति शब्दः "ज्योतिः" (प्रकाशः) तथा "लिङ्ग" (चिह्नम्) इत्येतयोः योगेन निर्मितः। पुराणेषु वर्णितम् यत् भगवान् शिवः अनन्तज्योतिस्तम्भरूपेण प्रकटितः अभवत्। तस्य प्रतीकत्वेन यानि लिङ्गानि प्रतिष्ठितानि, तानि "ज्योतिर्लिङ्गानि" इति कथ्यन्ते।
द्वादश ज्योतिर्लिङ्गानि— सोमनाथः, मल्लिकार्जुनः, महाकालेश्वरः, ओंकारेश्वरः, केदारनाथः, भीमाशंकरः, काशीविश्वनाथः, त्र्यम्बकेश्वरः, वैद्यनाथः, नागेश्वरः, रामेश्वरः, घृष्णेश्वरः च। एतेषु काशीविश्वनाथः विशेषमहत्त्वपूर्णः अस्ति।काशीविश्वनाथमन्दिरं उत्तरप्रदेशस्य वाराणसीनगरे स्थितम् अस्ति। एषा नगरी "काशी", "वाराणसी", "अविमुक्तक्षेत्रम्" इत्यादिनामभिः प्रसिद्धा वर्तते।
गङ्गातटे स्थित्वा एषा नगरी आध्यात्मिकजीवनस्य केन्द्रम् अस्ति।
"काशी विश्वनाथः" इति नाम दर्शयति यत् सः "विश्वस्य नाथः" सर्वलोकानां स्वामी अस्ति।
पुराणेषु काशीविश्वनाथमहिमा स्कन्दपुराणे, काशीखण्डे च काशीविश्वनाथस्य महिमा विस्तरेण वर्णिता विद्यते। उक्तं यत्—"काश्याम् मरणात् मुक्तिः"
अर्थात् काशीमध्ये मृत्युः मोक्षप्रदः भवति। भगवान् शिवः स्वयम् काशीक्षेत्रे निवसति, तथा मरणसमये जीवस्य कर्णे "तारक-मन्त्र" उपदिशति, येन सः मोक्षं प्राप्नोति।काशीविश्वनाथमन्दिरस्य इतिहासः अतीव प्राचीनः अस्ति। कालान्तरात् मन्दिरस्य विनाशः, पुनर्निर्माणं च अनेकवारं जातम्। मुगलकाले मन्दिरं ध्वस्तम् अभवत् , किन्तु पश्चात् मराठाराज्ञी अहिल्याबाई होल्कर महोदया अष्टादशशताब्द्यां वर्तमानमन्दिरस्य निर्माणं कृतवती। अद्य एषः मन्दिरः भारतस्य प्रमुखतीर्थेषु अन्यतमः अस्ति। एतस्य निम्नलिखितानि विशिष्टानि सन्ति-
१. मोक्षप्रदत्वम्-काशीविश्वनाथः मोक्षदायकः इति प्रसिद्धः। भक्ताः विश्वासं कुर्वन्ति यत् तस्य दर्शनमात्रेण पापक्षयः भवति।
२. शिवस्य करुणा-भगवान् शिवः "आशुतोषः" इति प्रसिद्धः—सः शीघ्रं प्रसन्नः भवति।विश्वनाथस्य आराधनया भक्ताः शीघ्रं फलम् अनुभवन्ति।
३. तारक-मन्त्रस्य महत्त्वम्-मरणसमये शिवः जीवस्य मोक्षाय मार्गदर्शनं करोति—एषा धारणा अत्यन्तं प्रेरणादायिनी अस्ति।

*काशीविश्वनाथमन्दिरं भारतीयसंस्कृतेः केन्द्रम् अस्ति। अत्र नित्यं पूजाः, उत्सवाः, आरत्यः च भवन्ति। संगीतं, नृत्यं, वेदपाठः एते सर्वे सांस्कृतिकजीवनं समृद्धयन्ति।देश-विदेशेभ्यः आगताः भक्ताः अत्र एकत्र भवन्ति। काशीविश्वनाथः केवलं धार्मिककेन्द्रं न, अपि तु सामाजिकैकतायाः प्रतीकः अस्ति। विभिन्नवर्गीयाः जनाः अत्र समत्वेन आगच्छन्ति। "वसुधैव कुटुम्बकम्" इति भावना अत्र अनुभूयते। काशीविश्वनाथमन्दिरं वाराणस्याः अर्थव्यवस्थायाः महत्वपूर्णं आधारः।स्थानीयव्यापारस्य वृद्धिः, जीविकोपार्जनसृजनम्,एते सर्वे आर्थिकविकासं साधयन्ति।काशीविश्वनाथमन्दिरे विविधाः उत्सवाः आचर्यन्ते—महाशिवरात्रिः,श्रावणमासः,देवदीपावली, एतेषु कालेषु लक्ष्याधिकभक्ताः आगच्छन्ति।द्वादशज्योतिर्लिङ्गेषु काशीविश्वनाथस्य स्थानं अद्वितीयम् अस्ति।*
*कारणानि—मोक्षप्रदत्वम्,शिवस्य स्थायीनिवासः,गङ्गातटस्थितिः एते सर्वे तस्य महिमानं वर्धयन्ति।काशीविश्वनाथः अस्मान् शिक्षयति—अहंकारत्यागः,सरलजीवनम्,भक्ति-श्रद्धा,करुणा,एते गुणाः मानवजीवनस्य उन्नतये आवश्यकाः सन्ति।सम्प्रति काशीविश्वनाथः विश्वस्तरे प्रसिद्धः अस्ति। डिजिटलमाध्यमेषु दर्शनम्,पर्यटनवृद्धिः,सांस्कृतिकप्रसारः एते सर्वे तस्य महत्त्वं वर्धयन्ति।ज्योतिर्लिङ्गेषु काशीविश्वनाथः अद्वितीयः, दिव्यः, मोक्षदायकः च अस्ति। अस्य दर्शनं केवलं धार्मिकानुभवः न, अपि तु आध्यात्मिकजागरणस्य मार्गः अपि अस्ति। अतः निष्कर्षतः वयं वक्तुं शक्नुमो यत्"काशीविश्वनाथः भक्तानां जीवनं प्रकाशयति, तान् मोक्षमार्गे प्रेरयति च।"*

# ऑक्सफोर्ड-विश्वविद्यालयस्य बोडलेयन-पुस्तकालयेन शिक्षापत्र्याः द्विशततम-वर्षगांठ-अवसरे संपूर्ण-ब्रिटेन-देशे प्रदर्शनी-यात्रायाः आयोजनम्




**हिमसंस्कृतवार्ता।** ऑक्सफोर्ड-विश्वविद्यालयस्य बोडलेयन-पुस्तकालय-शृङ्खलया शिक्षापत्र्याः द्विशततम-वर्षगांठ-अवसरे सम्पूर्णे ब्रिटेन-देशे एका प्रदर्शनी-यात्रा प्रारब्धा। शिक्षापत्री इति हिन्दूधर्मस्य अतीव महत्त्वपूर्णा दुर्लभा च पाण्डुलिपिः अस्ति। 'शिक्षापत्री' इत्यस्य अर्थः 'शिक्षाणाम् सङ्ग्रहः' इति, या १८२६ तमे वर्षे गुजरातस्य वाडताल-नगरे सहजानन्द-स्वामिना रचिता आसीत्। अस्याः यात्रायाः आयोजनं स्वामीनारायण-सम्प्रदायस्य प्रमुखैः सह मिलित्वा कृतम् अस्ति, यत्र मुख्यमन्दिरेषु अस्याः प्रदर्शनं भविष्यति। अनेन सहस्रशः भक्ताः अस्याः पवित्र-शिक्षापत्र्याः दर्शनस्य अवसरं प्राप्स्यन्ति। अस्यां शिक्षापत्र्यां नैतिक-जीवनस्य आध्यात्मिक-निर्देशानां च उपरि बलं दत्तम् अस्ति। कथ्यते यत् शुक्लपक्षस्य पञ्चम्यां तिथौ इयं लिखिता। अस्मिन् द्वादशाधिक-द्विशतं (२१२) संस्कृत-श्लोकाः सन्ति, येषु हिन्दू-धर्मग्रन्थानां प्रमुखाः शिक्षाः समाहिताः सन्ति।

# नासा-संस्थया आर्टेमिस-द्वितीय-अभियानेन चन्द्रस्य दुर्लभा प्रतिकृतिः प्रदर्शिता; नूतन-अन्तरिक्ष-कीर्तिमानस्य निर्माणाय सज्जता



अमेरिकायाः अन्तरिक्ष-संस्था 'नासा' आर्टेमिस-द्वितीय-अभियानस्य दलद्वारा चन्द्र-परिक्रमा-समये गृहीतं चन्द्रस्य एकं चित्रं प्रसारितवती। अस्याम् आकृत्यां चन्द्रस्य दक्षिण-भागे स्थितः सम्पूर्णः 'ओरिएंटल-बेसिन' दृश्यते, यः पूर्वं कदापि न दृष्टः। ओरियन-अन्तरिक्षयाने अमेरिकायाः त्रयः, कनाडादेशस्य च एकः नागरिकः वर्तन्ते। श्वः ओरियन-यानं स्वलक्ष्यं प्राप्स्यति इति आशा अस्ति। आर्टेमिस-द्वितीय-अभियानस्य उद्देश्यं चन्द्रस्य दूरस्थ-भागस्य चित्राङ्कनं वर्तते। पृथिव्याः लक्षचतुष्टयात् (४,००,००० किमी) अधिकं दूरं गत्वा इदं यानं मानव-अन्तरिक्ष-यात्रायाः कीर्तिमानं भङ्क्ष्यति। तदनन्तरं चन्द्रस्य परिक्रमा कृत्वा अवतरणं विना एव पुनः आगमिष्यति। प्रायः दश-दिवसीयम् इदं मिशनं मासस्य अस्य १० दिनाङ्के पूर्णं भविष्यति। नासा-संस्थायाः लक्ष्यं २०२८ वर्षं यावत् चन्द्रस्य दक्षिण-ध्रुवे अन्तरिक्ष-यात्रिणां प्रेषणम् अस्ति।

## नेपाल-देशे डोल-प्रसाद-अर्यालः प्रतिनिधि-सभायाः अध्यक्ष-पदे निर्विरोधं निर्वाचितः



नेपालदेशे सत्तारूढ-राष्ट्रिय-स्वतन्त्र-पार्टी (आरएसपी) दलस्य डोल-प्रसाद-अर्यालः अद्य देशस्य संसदः अध्यक्षत्वेन निर्वाचितः। राष्ट्रपतिः रामचन्द्र-पौडेलः तं राष्ट्रपति-कार्यालयस्य एकस्मिन् विशेष-समारोहे पदस्य गोपनीयतायाः च शपथम् अकारयत्। संसदीय-सचिवालयस्य कथनानुसारं, आरएसपी-उपाध्यक्षः श्री अर्यालः प्रतिनिधि-सभायाः सदस्यानां उपवेशने निर्विरोधं सङ्घीय-संसदः निम्नसदनस्य अध्यक्षः चितः।

## पाकिस्ताने खैबर-पख्तूनख्वा-प्रान्ते अतिवृष्टि-कारणात् पञ्चचत्वारिंशत् (४५) जनानां मृत्युः, महत् जनधनहानिः च



पाकिस्तान-देशस्य खैबर-पख्तूनख्वा-प्रान्ते विगत-दशदिनेषु वर्षा-सम्बद्ध-दुर्घटनासु पञ्चचत्वारिंशत् (४५) जनाः मृताः, पञ्चोत्तर-शतं (१०५) च आहताः अभवन्। प्रान्तीय-आपदा-प्रबन्धन-प्राधिकरणेन (पीडीएमए) अद्य सूचितं यत् मृतेषु २३ बालकाः, १७ पुरुषाः, ५ महिलाः च सन्ति। पीडीएमए-वृत्तानुसारं प्रचण्डवृष्ट्या बह्वेषु जनपदेषु छदिः भित्तयः च पतिताः, येन प्रायः ४४२ गृहाणि क्षतिग्रस्तानि अभवन्। अस्मिन् अन्तरे, महानिदेशकेन चेतावनी दत्ता यत् ९ एप्रिल-दिनाङ्कं यावत् प्रान्ते पुनः अतिवृष्टेः सम्भावना अस्ति।

# "सुभाषितरसास्वादः" "सामान्यनीति"

श्लोकः-

**"कन्या वरयते रुपं माता वित्तं पिता श्रुतम्।**
**बान्धवाः कुलमिच्छन्ति,मिष्टान्नमितरे जनाः।।"**

{नैषधीयचरितम् श्रीहर्षः}

अर्थः- विवाहनिश्चितेसमये वधूः वरस्य रुपं पश्यति, माता तस्य आर्थिकस्थिति पश्यति, पिता कुलस्य ख्याति, वैभवं पश्यति। बान्धवाः तस्य कुटुम्बस्य श्रेष्ठतां पश्यन्ति। अन्ये जनाः केवलं मिष्टान्नस्य विषये चिन्तयति।

गूढार्थः- सुभाषितकारेण अत्र कटुसत्यं उक्तम्। अधुना विवाहः केवलं दर्शयितुम् एव अभवत्।

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

नन्दिनी- किं त्वया श्रुतम्? एकेनोच्च-शिक्षाप्राप्तेन युवकेन कार्यकाले केवलं लघु-चलचित्राणि दृष्टानि। तेन कथितं यत् तस्मै किमपि मुख्यं कार्यं न दत्तम्।

**काव्या-** आम्, मया पठितम्। कर्माभावेन स एवं कृतवान् अस्ति। अपरतः, एकेन कर्म-प्रदात्रा रहस्यं प्रकटीकृतम्। आवेदन-कर्तारः किमर्थमुत्तरं विनोपेक्षिता इति तेन विवृतम्।

**नन्दिनी-** कर्मकराणां निरुत्तरोपेक्षा अनुचिता। अष्टविंशति-वर्षेभ्यः पूर्वम् 'आमाजन'-नाम्ना संस्थया प्रथमं विक्रीतं पुस्तकं 'कृत्रिम- बुद्धि' विषयेऽभूत्। अधुना तद्विषये बेजोस- मस्क-नामकाभ्यां धनिकाभ्यां चर्चा कृता।

**काव्या-** तद् विस्मयकरं यत् सा संस्था तदैवारब्धा। किन्तु बेङ्गलूरुनगरे गृहान्वेषणं त्विदानीं दुःस्वप्न इव जातम्। तत्र निवास-भाटकं सप्तति- सहस्र- रूप्यकाणि प्राप्तवत् अस्ति।

**नन्दिनी-** एतत् त्वतिशयितं मूल्यम्। अद्यैतावदेव। धन्यवादः।

## आन्ध्रप्रदेशस्य मुख्यमन्त्री एन. चन्द्रबाबू नायडू जलसुरक्षायाः महत्त्वे बलं दत्तवान्

आन्ध्रप्रदेशस्य मुख्यमन्त्री एन. चन्द्रबाबू नायडू राज्यस्य सर्वेषां क्षेत्राणां विकासाय जलसुरक्षायाः महत्त्वे बलं दत्तवान् अस्ति। सिञ्चन-अधिकारिभिः जल-उपयोक्तृ-सङ्घैः च सह दूरभाष-माध्यमेन (Teleconference) चर्चामग्रे मुख्यमन्त्रिणा घोषितं यत् श्वः आरभ्य सम्पूर्णराज्ये 'जलसुरक्षा-उत्तरदायित्व-कार्यक्रमः' प्रवर्तयिष्यते। श्वः अनन्तपुर-जनपदस्य ताडिपत्री-क्षेत्रात् चतुर्षु चरणेषु औपचारिकरूपेण आरभ्यमाणा इयं शतदिवसीया 'जलसुरक्षा-कार्ययोजना' जलसंरक्षणे संसाधनानां सुरक्षायां च केन्द्रिता भविष्यति। अस्मिन् सिञ्चन-सङ्घानां महती भूमिका भविष्यति। मुख्यमन्त्रिणा उक्तं यत् अस्याः पहलस्य उद्देश्यं राज्यं सुभिक्षं (अनावृष्टि-मुक्तं) करणीयम् अस्ति, येन ग्रीष्म-वर्षाकालेषु पर्याप्तं भूगर्भजलं तिष्ठेत्। श्री चन्द्रबाबू नायडू वैज्ञानिक-योजनायै उपग्रह-चित्राणां 'हाइड्रोलॉजिकल-मैपिंग' इत्यस्य च उपयोगे बलं दत्तवान्,

## कुम्भमेला भारतस्य समावेशी-सांस्कृतिक-भावनायाः प्रतीकम्: मुख्यमन्त्री देवेन्द्र फडणवीसः



महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्र फडणवीसः उक्तवान् यत् कुम्भमेला भारतस्य समावेशी-सांस्कृतिक-भावनायाः प्रतीकम् अस्ति, यत्र जनाः जाति-विचारधाराभ्यां परे एकीभूय आगच्छन्ति। एकां धार्मिकसभां सम्बोधयन् श्री फडणवीसः अवदत् यत् लक्षशः भक्तानां कृते सुचारु-व्यवस्थां निश्चितं कर्तुं राज्यसर्वकारः नासिक-नगरे २०२७ तमे वर्षे भविष्यमाणस्य 'सिंहस्थ-कुम्भमेलायाः' कृते व्यापिकां सज्जतां करोति। राज्यस्य सांस्कृतिक-विरासतस्य महत्त्वं प्रतिपादयन् श्री फडणवीसः स्पष्टीकृतवान् यत् सन्त-समुदायं कलङ्कितं कुर्वतां व्यक्तीनां विरुद्धं कठोराचारणं करिष्यते।